ससरं निर्ज्जलं घोलं मथितन्त्वसरोदकम् ॥
तक्रं पादजलं प्रोक्तमुदाश्विच्चार्द्धवारिकम् ।
छच्छिका सारहीना स्यात् स्वच्छा प्रचुर-
वारिका ॥”

इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥
“ससरं निर्जलं घोलं मथितं सरवर्ज्जितम् ।”
इति च हारीते प्रथमस्थाने अष्टमेऽध्याये ॥)

मथुरा, स्त्री, (मथ्यते पापराशिर्यया इति । मथ + “मन्दिवाशीत्यादि ।” उणा० । १ । ३६ । इति उरच् ।) स्वनामख्यातपुरी । अधुना आगरा इति ख्यातस्याग्रवणस्य नगरम् । (यथा, रघौ । ६ । ४८ ।

“यस्यावरोधस्तनचन्दनानां
प्रक्षालनाद्वारिविहारकाले ।
कलिन्दकन्या मथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति ॥”)

तत्पर्य्यायः । मधुपन्नम् २ । इति त्रिकाण्डशेषः ॥ मधुपुरी ३ मधुरा ४ । इति शब्दरत्नावली ॥ सा च मोक्षदायकतीर्थम् । यथा,—

“अयोध्या मथुरा माया काशी काञ्ची अव-
न्तिका ।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः ॥
अयोध्या रामनगरी मथुरा कृष्णपालिता ।
एतास्तु पृथिवीमध्ये न गण्यन्ते कदाचन ॥
श्रीरामधनुरग्रस्था अयोध्या सा महापुरी ।
मथुरा केशवोत्कृष्टसुदर्शनविधारिता ॥”

इत्यादिभूतशुद्धितन्त्रम् ॥ *॥

तत्र विष्णुदर्शनमाहात्म्यं यथा,
“ज्यैष्ठशुक्लद्वादश्यां स्नात्वा वै यमुनाजले ।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम् ॥
यमुनासलिले स्नातः पुरुषो मुनिसत्तम ! ।
ज्यैष्ठामूलामले पक्षे द्वादश्यामुपवासकृत् ॥
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः ।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम् ॥
कश्चिदस्मत्कुले जातः कालिन्दीसलिलाप्लुतः ।
अर्च्चयिष्यति गोविन्दं मथुरायामुपोषितः ॥
ज्यैष्ठामूलसिते पक्षे येनैवं वयमप्युत ।
परामृद्धिमवाप्स्यामस्तारिताः स्वकुलोद्भवैः ॥”

इति विष्णुपुराणे ६ अंशे ८ अध्यायः ॥ *॥

तस्या माहात्म्यं यथा,—

वराह उवाच ।

“न विद्यते च पाताले नान्तरीक्षे न मानुषे ।
समत्वं मथुराया हि प्रियं मम वसुन्धरे ! ॥”

सूत उवाच ।

“तच्छ्रुत्वा वचनं तस्य प्रणम्य शिरसा तदा ।
पुण्यानां परमं पुण्यं पृथ्वी वचनमब्रवीत् ॥

पृथिव्युवाच ।

पुष्करं नैमिषं चैव पुरी वाराणसी तथा ।
एता हित्वा महाभाग ! मथुरां किं प्रशंससि ॥

वराह उवाच ।

शृणु कार्त्स्न्येन वसुधे ! कथ्यमानं मयानघे ! ।
मथुरेति च विख्यातं नास्ति क्षेत्रं परं मम ।
सा रम्या च सुप्रशस्ता च जन्मभूमिः प्रिया मम ॥
शृणु देवि ! यथा स्तौमि मथुरां पापहारि-
णीम् ।
तन्निवासी नरो याति मोक्षं नास्त्यत्र संशयः ॥
महामाघ्यां प्रयागे तु यत् फलं लभते नरः ।
तत् फलं लभते देवि ! मथुरायां दिने दिने ॥
कार्त्तिक्याञ्चैव यत् पुण्यं पुष्करे तु वसुन्धरे ! ।
तत् फलं लभते देवि ! मथुरायां दिने दिने ॥
पूर्णे वर्षसहस्रे तु वाराणस्यान्तु यत् फलम् ।
तत् फलं लभते देवि ! मथुरायां क्षणेन हि ॥
मथुराञ्च परित्यज्य योऽन्यत्र कुरुते रतिम् ।
मूढो भ्रमति संसारे मोहितो मायया मम ॥
यः शृणोति वरारोहे ! माथुरं मम मण्डलम् ।
अन्येनोच्चारितं शंसन् सोऽपि पापैः प्रमुच्यते ॥
पृथिव्यां यानि तीर्थानि आसमुद्रसरांसि च ।
मथुरायां गमिष्यन्ति सुप्ते चैव जनार्द्दने ॥
मथुरां समनुप्राप्य श्राद्धं कृत्वा यथाविधि ।
तृप्तिं यान्तीह पितरो यावत् स्थित्यग्रजन्मनः ॥
ये वसन्ति महाभागे ! मथुरामितरे जनाः ।
तेऽपि यान्ति परां सिद्धिं मत्प्रसादान्न संशयः ॥
कुलाम्रके शौकरवे मथुरायां विशेषतः ।
विना सांख्येन योगेन मुच्यते नात्र संशयः ॥
मथुरायां महापुर्य्यां ये वसन्ति शुचिव्रताः ।
बलिभिक्षाप्रदातारो ये वा ते नरविग्रहाः ॥
भविष्यामि वरारोहे ! द्वापरे युगसंस्थिते ।
ययातिभूपवंशाच्च क्षत्रियः कुलवर्द्धनः ॥
भविष्यामि वरारोहे ! मथुरायां न संशयः ।
मूर्त्तिं चतुर्व्विधां कृत्वा स्थास्यामि ऋषिभिः
स्तुतः ॥
स्थास्यामि वत्सरशतं युद्धेषु कृतनिश्चयः ।
एका चन्द्रनसङ्काशा द्वितीया कनकप्रभा ॥
अशोकसदृशा चान्या अन्या चोत्पलसन्निभा ।
तत्र गुह्यानि नामानि भविष्यन्ति मम प्रिये ! ॥
पुण्यानि च पवित्राणि संसारोच्छेदनानि च ।
यत्राहं घातयिष्यामि द्वात्रिंशति वसुन्धरे ! ॥
दैत्यान् घोरान् महाभागे ! कंसादीन् घोर-
दर्शनान् ।
यमुना यत्र सुवहा नित्यं सन्निहिता ध्रुवम् ॥
वैवस्वतस्वसा रम्या यमुना यत्र विश्रुता ।
तां नदीं यमुनां गङ्गां प्रयागे सङ्गविश्रुताम् ॥
गङ्गाशतगुणा पुण्या मथुरे मम मण्डले ।
यमुना विश्रुता देवि ! नात्र कार्य्या विचारणा ॥
तत्र तीर्थानि गुह्यानि भविष्यन्ति ममानघे ! ।
येषु स्नानपरो देवि ! मम लोके महीयते ॥
अथात्र मुञ्चते प्राणान् मम कर्म्मपरायणः ।
न जायते स मर्त्त्येषु जायते च चतुर्भुजः ॥
अविमुक्ते नरः स्नातो मुक्तिं प्राप्नोत्यसंशयम् ।
तथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ।
विश्रान्तिसंज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
यस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
सर्व्वतीर्थेषु यत् स्नानं सर्व्वतीर्थेषु यत् फलम् ।
तत् फलं लभते देवि ! दृष्ट्वा देवं गतश्रमम् ॥
न च यज्ञैर्न तपसा न ध्यानैर्न च संयमैः ।
तत् फलं लभते देवि ! स्नातो विश्रान्तिसंज्ञके ॥
कालत्रयन्तु वसुधे ! यः पश्यति गतश्रमम् ।
कृत्वा प्रदक्षिणे द्वे तु विष्णुलोकं स गच्छति ॥
अस्ति चान्यत् परं गुह्यं सर्व्वसंसारमोक्षणम् ।
यस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
प्रयागं नाम तीर्थन्तु देवानामपि दुर्लभम् ।
तस्मिन् स्नातो नरो देवि ! अग्निष्टोमफलं लभेत् ॥
इन्द्रलोकं समासाद्य नरो वै तत्र मोदते ।
अथात्र मुञ्चते प्राणान् मम लोकं स गच्छति ॥
तथा कनखलं तीर्थं नाम गुह्यं परं मम ।
स्नानमात्रेण तत्रापि नाकपृष्ठे स मोदते ॥
अस्ति क्षेत्रं परं गुह्यं तिन्दुकं नाम नामतः ।
तस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
अस्मिंस्तीर्थे पुरावृत्तं तच्छृणुष्व वसुन्धरे ! ।
पाञ्चालविषये देवि ! काम्पिल्यञ्च पुरोत्तमम् ॥
धनधान्यसमायुक्तं ब्रह्मदत्तेन पालितम् ।
तस्मिंस्तु वसते देवि ! तिन्दुको नाम नामतः ॥
तस्मिंस्तु वसतस्तस्य नापितस्य पुरोत्तमे ।
कालेन महता तस्य कुटुम्बः क्षयमागतः ॥
क्षीणे कुटुम्बे तु तदा सुभृशं दुःखपीड़ितः ।
सर्व्वसङ्गपरित्यागी यो गच्छन् मथुरापुरीम् ।
ब्राह्मणावसथे सोऽपि वसमानो वसुन्धरे ! ॥
तत्र कर्म्मशतं कृत्वा स्नात्वेव यमुनां नदीम् ।
तत्र दानञ्च कुरुते नित्यकालं दृढ़व्रतः ॥
ततः कालेन महता पञ्चत्वं समुपागतः ।
तस्य तीर्थप्रभावेण जातोऽसौ ब्राह्मणोत्तमः ॥
तस्मिन् वरगृहे देवि ! ब्राह्मणो योगिनां वरः ।
जातिस्मरो महाप्राज्ञो विष्णुभक्तो वसुन्धरे ! ॥
तस्य तीर्थप्रभावेण प्राप्ता मुक्तिः सुदुर्लभा ॥
ततः परं सूर्य्यतीर्थं सर्व्वपापप्रमोचनम् ।
वैरोचनेन बलिना सूर्य्यस्त्वाराधितः पुरा ॥
भ्रष्टराज्येन बलिना धनकामेन वै पुरा ।
ऊर्द्धबाहुर्निराहारस्तप्तवानुत्तमं तपः ॥
साग्रं संवत्सरं देवि ! ततः काममवाप्नुयात् ।
तस्य प्रसन्नो भगवान् द्युमणिः प्रत्यभाषत ॥
किं कार्य्यं बले ! ब्रूहि तपस्यसि सुदुस्तपः ॥”

बलिरुवाच ।

“भ्रष्टराज्योऽस्मि देवेश ! पाताले निवसाम्यहम् ।
वित्तेनापि विहीनस्य कुटुम्बभरणं कुतः ॥
मुकुटात्तस्य वै सूर्य्यो ददौ चिन्तामणिं ततः ।
चिन्तामणिं समासाद्य पातालमगमत्तदा ॥
तस्मिंस्तीर्थे नरः स्नात्वा सर्व्वपापैः प्रमुच्यते ।
तत्रापि मुञ्चते प्राणान् मम लोकं स गच्छति ॥
आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्य्ययोः ।
तस्मिन् स्नातो नरो देवि ! राजसूयफलं लभेत् ॥
यत्र ध्रुवेण सन्तप्तं इच्छया परमं तपः ।
अत्र वै स्नानमात्रेण ध्रुवलोके महीयते ॥
तत्रापि मुञ्चते प्राणान् मम लोके महीयते ॥
ध्रुवतीर्थे च वसुधे यः श्राद्धं कुरुते नरः ।
पितॄंस्तारयते सर्व्वान् पितृपक्षे विशेषतः ॥
दक्षिणे ध्रुवतीर्थस्य तीर्थराजं प्रकीर्त्तितम् ।